# Shri Ashtalakshmi Stuti

# શ્રીઅષ્ટલક્ષ્મીસ્તુતિઃ

## Document Information

Text title : Ashtalakshmi StutiH 1

File name : aShTalakShmIstutiH.itx

Category : devii, lakShmI, devI

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : shrIlakShmIkaTAkSha S K Rajagopalan 2001 collection of Laxmistotras

Latest update : May 5, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2022

*sanskritdocuments.org*

# શ્રીઅષ્ટલક્ષ્મીસ્તુતિઃ

આદિલક્ષ્મીઃ ।
સુમનોવન્દિતસુન્દરિ માધવિ ચન્દ્રસહોદરિ હેમમયિ
મુનિગણકાઙ્ક્ષિતમોક્ષપ્રદાયિનિ મઞ્જુલભાષિણિ વેદનુતે ।
પઙ્કજવાસિનિ દેવસુપૂજિતે સદ્ગુણવર્ષિણિ શાન્તિયુતે
જય જય હે મધુસૂદનકામિનિ આદિલક્ષ્મિ પરિપાલય મામ્ ॥

ધનલક્ષ્મીઃ ।
અયિ કલિકલ્મષનાશિનિ કામિનિ વૈદિકરૂપિણિ વેદમયિ
ક્ષીરસમુદ્ભવમઙ્ગલરૂપિણિ મન્ત્રનિવાસિનિ મન્ત્રનુતે ।
મઙ્ગલદાયિનિ અમ્બુજવાસિનિ દેવગણાશ્રિતપાદયુગે
જય જય હે મધુસૂદનકામિનિ ધાન્યલક્ષ્મિ પરિપાલય મામ્ ॥

ધૈર્યલક્ષ્મીઃ ।
જય વરવર્ણિનિ વૈષ્ણવિ ભાર્ગવિ મન્ત્રસ્વરૂપિણિ મન્ત્રમયિ
સુરગણવિનુતે અતિશયફલદે જ્ઞાનવિકાસિનિ શાસ્ત્રનુતે ।
ભવભયહારિણિ પાપવિમોચિનિ સાધુસમાશ્રિતપાદયુગે
જય જય હે મધુસૂદનકામિનિ ધૈર્યલક્ષ્મિ પરિપાલય મામ્ ॥

ગજલક્ષ્મીઃ ।
જય જય દુર્ગતિનાશિનિ કામિનિ બહુદે શુભકલહંસગતે
રથગજતુરગપદાદિસમાવૃતપરિજનમણ્ડિતરાજનુતે ।
સુરવરધનપતિપદ્મજસેવિતતાપનિવારકપાદયુગે
જય જય હે મધુસૂદનકામિનિ ગજલક્ષ્મિ પરિપાલય મામ્ ॥

સન્તાનલક્ષ્મીઃ ।
અયિ ખગવાહે મોહિનિ ચક્રિણિ રાગવિવર્ધિનિ સન્મતિદે
ગુણગણવારિધે લોકહિતૈષિણિ નારદતુમ્બુરુગાનનુતે ।
સકલસુરાસુરદેવમુનીશ્વરભૂસુરવન્દિતપાદયુગે

જય જય હે મધુસૂદનકામિનિ સન્તાનલક્ષ્મિ પરિપાલય મામ્ ॥

વિજયલક્ષ્મીઃ ।
કમલનિવાસિનિ સદ્ગતિદાયિનિ વિજ્ઞાનવિકાસિનિ કામમયિ
અનુદિનમર્ચિતકુઙ્કુમભાસુરભૂષણશોભિ સુગાત્રયુતે ।
સુરમુનિસંસ્તુતવૈભવરાજિતદીનજનાશ્રિતમાન્યપદે
જય જય હે મધુસૂદનકામિનિ વિજયલક્ષ્મિ પરિપાલય મામ્ ॥

ઐશ્વર્યલક્ષ્મીઃ ।
પ્રણતસુરેશ્વરિ ભારતિ ભાર્ગવિ શોકવિનાશિનિ રત્નમયિ
મણિગણભૂષિતકર્ણવિભૂષણકાન્તિસમાવૃતહાસમુખિ ।
નવનિધિદાયિનિ કલિમલહારિણિ કામિતવરદે કલ્પલતે
જય જય હે મધુસૂદનકામિનિ ઐશ્વર્યલક્ષ્મિ પરિપાલય મામ્ ॥

ધનલક્ષ્મીઃ ।
ધિમિધિમિધિન્ધિમિદુન્દુમદુમદુમદુન્દુભિનાદવિનોદરતે
બમ્બમ્બોં બમ્બમ્બોં પ્રણવોચ્ચારશઙ્ખનિનાદયુતે ।
વેદપુરાણસ્મૃતિગણદર્શિતસત્પદસજ્જનશુભફલદે
જય જય હે મધુસૂદનકામિનિ ધનલક્ષ્મિ પરિપાલય મામ્ ॥

ઇતિ શ્રીઅષ્ટલક્ષ્મીસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by PSA Easwaran

*Shri Ashtalakshmi Stuti*
pdf was typeset on August 30, 2022

Please send corrections to *sanskrit@cheerful.com*